दिनाङ्क :- 07.05.2025

प्रात: - 06:55

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

**अथ वार्ता:**

**भारतम्-सिन्दूराभियानम्**

भारतीयसशस्त्रबलै: सिन्दूरइत्यभिनामधेयकम् अभियानं समारब्धम्। यस्मिन् पाकिस्तान-देशे अथ च पाकिस्तानधिकृत-जम्मू-कश्मीरे आतङ्कवादाधारभूतसंरचनायां आक्रमणम् जातम् यत्र भारतं विरुध्य आतङ्क्याक्रमणानां योजना निर्मिता अपि च निर्दिष्टासीत्। रक्षामन्त्रालयेन एकस्मिन् वक्तव्ये प्रोदीरितं यत् आहत्य नवस्थानेषु आक्रमणम् व्यापादितम्।

मन्त्रालय: अग्रे सूचितवान् यत् कृतकार्याचरणम् केन्द्रितं मापितम् अथ च प्रकृत्याम् उग्रेतरप्रकृतियुतमासीत्। मन्त्रालयेन स्पष्टीकृतं यत् किमपि पाकिस्तानसम्बद्धं सैन्यसौविध्यम् नैव अभिचिह्नितम्। एतदतिरिच्य लक्ष्यचयनावधौ निष्पादनपद्धत्यां च पर्याप्तं मितत्वं प्रदर्शितम् भारतेन। पहलगामातङ्क्याक्रमणे पञ्चविंशति-सङ्ख्यकान् भारतीयान् समेत्य एक: नेपालदेशीय: जन: मारित:, तां घटनाम् अवलोक्यैव अयं पदक्षेप: उत्थापित:।

मन्त्रालयेन एतदपि प्रतिपादितं यत् सशस्त्रबलानि प्रतिबद्धतां सम्पूरयन्ति यत् अस्मै आतङ्क्याक्रमणाय उत्तरदायिन: जना: उत्तरयुता: भवेयुरिति। ऑपरेशन-सिन्दूर-इत्येतस्मिन् विषये अद्य कालान्तरे विस्तृतपूर्वकसूचना प्रदास्यते।

**भारतीय-सेना**

भारतीय-सेनया प्रतिपादितं यत् पाकिस्तानेन पुंछ-राजौरी क्षेत्रस्य भीमबेर-गली-इत्यस्मिन् स्थले प्रक्षेपयुतं गोलिकाप्रहारं कृत्वा पुनरेकदा सङ्घर्ष-विराम-सन्धि: उल्लङ्घित:। सामाजिकसन्देशपटले भारतीयसेना प्रावोचत् यत् तया उचितविधिना प्रत्युत्तरं प्रदीयते।

**भारतीयवायुसैन्यबलम्**

भारतीयवायुसेना अद्यारभ्य राजस्थाने पाकिस्तानेन सह अन्ताराष्ट्रिय-सीम्नि द्विदिवसात्मकं बृहत्तमं सैन्याभ्यासं करिष्यति। भारतीय-वायुसेनया अयम् अभ्यास: पूर्वनियोजित: नियमित: प्रशिक्षणाभ्यास: सूचित:। एतस्मिन् अभ्यासे राफेल-सुखोई-30-जगुआर-तादृशानि योद्धृविमानानि सम्मिलितानि भविष्यन्ति। भारतीय-विमानपत्तनप्राधिकरणद्वारा प्रसारितं **नोटम** इत्यनुसारम्

अभ्यासोऽयम् मध्याह्ने सार्ध त्रिवादने समारप्स्यते तथा च श्व: रात्रौ नववादनं यावत् प्रचलिष्यति। यस्मिन् विमानक्षेत्रम् प्रतिबन्धितं भविष्यति।

**प्रधानमन्त्री**

प्रधानमन्त्रिणा नरेन्द्रमोदिना निगदितं यत् भारतस्य नदीनाम् जलम् साम्प्रतं देशस्य हिताय उपयुज्यते। ह्य: नवदिल्ल्यां एकस्या: स्वायत्तवाहिन्या: सम्मेलनं सम्बोधयन् प्रधानमन्त्री अवदत् यत् भारतस्य यत् जलम् पूर्वं बहि: आसीत् तत् अधुना भारतस्य हिताय उपयुज्यते अथ च देशाय उपयोगी भविष्यति।

**दिल्ली-पूर्वाभ्यास:**

नागरिक-सुरक्षाम् आधृत्य मॉकड्रिल-इति आपत्कालिक-कृत्रिमाभ्यास: देशस्य चतुश्चत्वारिंशदधिकद्विशत-जनपदेषु अद्य आयोज्यते। अभ्यासम् एनम् समाश्रित्य दिल्लीशिक्षानिदेशालयेनापि सर्वा: विद्यालयीयप्रमुखा: आपत्प्रतिक्रियायां छात्रेभ्य: शिक्षकेभ्यश्च प्रशिक्षण-सत्रम् आयोजयितुं निर्दिष्टा:। विद्यालयेभ्य: एतदर्थम् एकम् दृश्याङ्कनमपि विनिमयीकृताम्। यद्धि उचितं मॉकड्रिल-इति कथम् आयोजयिष्यते इति सूचयति। राष्ट्रव्यापिन: कृत्रिमाभ्यासस्य रूपेण दिल्ल्याम् अधिकारिण: पञ्चपञ्चाशत्स्थानेषु ऑपरेशन अभ्यास इत्यस्य अभियानस्य सञ्चालनं करिष्यन्ति। अधिकारिभि: सूचितं यत् वायवीयाक्रमणम् अग्निकाण्डम् अन्वेषणाभियानं सदृशीनाम् आपत्कालिक-स्थितिनाम् अनुकरणं करिष्यते।

**सीयूईटी**

स्नातकस्तरीया सामान्यविश्वविद्यायप्रवेशपरीक्षा सम्प्रति स्थगिता जाता। अधुना परीक्षेयं मेमा◌ासस्य त्रयोदशदिनाङ्के समनुष्ठास्यते इति राष्ट्रिय-परीक्षाभिकरणेन गतरात्रौ सूचितम्।

**आई.पी.एल्.**

आई.पी.एल्. इत्येतस्यां विंशतिप्रतिविंशति-क्रिकेट्-स्पर्धा-मालिकायाम् गतरात्रौ गुजरात-टाइटन्स-दलेन मुम्बई-इण्डियन्स-दलं त्रीभि: स्तोभै: पराजितम्। तत्रैव अद्य कोलकाताया: ईडन-गार्डन्स-क्रीडाङ्गणे कोलकाता-नाइट-राइडर्सदलं चेन्नई-सुपर-किंग्स-दलं सम्मुखीकरिष्यति। क्रीडैषा सायंकाले सार्धसप्तवादने क्रीडिष्यते।

।। **इति वार्ता:**।।